International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2025; 2(1): 75-81
© 2025 IJMH
www.themultijournal.com
Received: 15-02-2025
Accepted: 24-02-2025
Publish : 26-02-2025

**डॉ. संगीता गुन्देचा**
सहाचार्या, नाट्यशास्त्र अध्ययन एवं अनुसंधान केन्द्र, केन्द्रीय संस्कृत-विश्वविद्यालय, भोपाल

**Correspondence:**
**डॉ. संगीता गुन्देचा**
सहाचार्या, नाट्यशास्त्र अध्ययन एवं अनुसंधान केन्द्र, केन्द्रीय संस्कृत-विश्वविद्यालय, भोपाल

# मानवीय मूल्यानां अनुपम कोशः अभिज्ञानशाकुन्तलम्

**डॉ. संगीता गुन्देचा**

## भूमिका :

महाकविकालिदासप्रणीतं'अभिज्ञानशाकुन्तलम्'मानवीयमूल्यानां जीवनदर्शनस्य च अनुपमः कोशः अस्ति। अस्मिन् नाटके कविकुलगुरुः विविधान् आयामान् उपस्थापितवान्। अत्र प्रकृत्या सह मानवस्य घनिष्ठसम्बन्धः,सदाचारः,अतिथिसेवा, सामाजिककर्त्तव्यानि तथा च राजधर्मस्य उत्कृष्टं चित्रणं प्राप्यते। प्रस्तुतलेखे वयं शाकुन्तलस्य श्लोकान् आधृत्य पर्यावरण-नैतिक-धार्मिक-सामाजिक-प्रशासनिकशिक्षाणां प्रासङ्गिकतां विमृशामः।

## 1. प्राकृतिकसौन्दर्यता पर्यावरणशिक्षा च

प्रकृतिं मानवानां सहचरी कथ्यते यतोहि व्यवहारिकरूपे मानवेतर समस्तसृष्टि प्रकृतिमेव विद्यते। अस्मिन् ब्रह्माण्डे मानवानाम् उपभोक्तुं नैकानि संसाधानानि आधिक्यं लभ्यन्ते। यस्मात् कारणात् मानवाः निरन्तरं प्रभावितो भवन्ति अतः इमाः प्रभावकारिणः दशाःपर्यावरणसंज्ञया अभिधीयते इति। "पर्यावरणम्" इति शब्दः द्वयोः शब्दयोः मिलित्वा निष्पन्नः जातः वर्तते। परि+आवरणं "परि" शब्दस्यार्थः "परितः" तथा "आवरणस्य" अर्थः "आच्छादनम्" अर्थात् अस्मान् परितः यादृशं वातावरणं भवन्ति तान् सर्वान् पर्यावरणम् कथ्यन्ते। पर्यावरणेन सह मानवानाम् अविभाज्यः सम्बन्धः वर्तन्ते। अस्मिन् पर्यावरणे यदि कोऽपि अनावश्यकं परिवर्तनं करिष्यति तर्हि संसारस्य कृते हानिः भविष्यत्येव। अतः पर्यावरणसंरक्षणम् अधुना अस्माकं कृते चिन्तनस्य प्रमुखः विषयः विद्यते।

कालिदासस्य प्रकृतिप्रेमपर्यावरणानुरागश्च तस्य कृतिषु दृश्यते यतोहि कालिदासस्य पर्यावरण-चिन्तनमेव मानवस्य प्रकृतेश्च घनिष्ठसम्बन्धेषु आधारितो विद्यते। अभिज्ञानशाकुन्तल-नाटकेऽपि केषुचित् श्लोकेषु पर्यावरणजागरुकतायाः विषये वर्णनं प्राप्यते।

यथा

**पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या,**
**नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्।**
**आद्यो वः कुसुमप्रसूतिसमये यस्याः भवत्युत्सवः,**
**सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्।।** (4/9 अभिज्ञानशाकुन्तलम्)

अस्य श्लोकस्यार्थः वर्तते यत् या शकुन्तला युष्मभ्यं जलदानात् पूर्व जलपानं न अकरोत्। या पुष्पपल्लवालङ्कार प्रियापि युष्मास स्नेहात् कारणात् एकमपि पल्लवं न अत्रोटयत्। भवताम् प्रथमं पुष्पोदयकाले यस्याः कृते महानोत्सवः मन्यते स्म एवा सा शकुन्तला अद्य पतिगृहं गच्छति अतः सर्वे ताम् गमनस्य अनुमतिं दद्युः इति।

उपर्युक्त श्लोके शैक्षिकदृष्ट्या स्पष्टं भवति यत् शकुन्तलायाः प्रकृतिं प्रति प्रेमं प्रदर्शयति। तपोवने निवसन् शकुन्तलायाः लतावृक्षैः सह बन्धुत्त्वभावना भवति स्म। येन प्रकारेण सा सदैव तपोवनवृक्षेभ्यः पूर्वं जलं दत्त्वा तदनन्तरं स्वयं जलं पिबति स्मा तस्मात् स्नेहकारणात् पुष्पाणि कदापि न अत्रोटयत्। तया प्रकृतिं प्रति सहानुभूतिप्रेमश्च प्रकटयति यतोहि वृक्षान् सचेतनप्राणी मन्यते। तेन प्रकारेण अस्माकमपि कर्त्तव्यं विद्यन्ते।

अनेन श्लोकमाध्यमेन एषा शिक्षा प्राप्यते यत् प्रकृतिः सचेतना अस्ति अतः अस्याः संरक्षणं अस्माकं दायित्त्वं भवति। वृक्षाभ्याम् जलखाद्यन् . दत्त्वा तां संरक्षणीयम् यतोहि ते अस्माकं पर्यावरणं शुद्धं कुर्वन्तु । मानवजीवने पर्यावरणशिक्षायाः भूमिका अती-वमहत्त्वपूर्णा भवति, येन बनाः पर्यावरणं प्रति जागरुकताः भवन्तीति।

अपिच -

**क्षौमं केनचिदिन्दुपाण्डुतरुणा माङ्गल्यमाविष्कृतं**
**निष्ठयुतश्चरणोपभोगसुलभो लाक्षारसः केनचित्।**
**अन्येभ्यो वनदेवताकरतलैरापर्वभागोत्थितैः**
**दंत्तान्याभरणानि तत्किसलयोद्भेदप्रतिद्वन्द्विभिः।।**

(4-5 अभिज्ञानशाकुन्तलम् )

अस्य श्लोकस्यार्थः अस्ति यत् केचित् वृयीः चन्द्रधवलानि माङ्गलिक वचाणि प्रेभ्यः वनदेवताकरतलेभ्यः विभिन्नानि नानि अस्मदस्ते समागतानि इति।

श्लोकेस्मिन् श्लोके कविः प्रकृतिं प्रति वदति यत् पतिगृहगमनकाले वृक्षाः शकुन्तलायाः कुते बहूनि आभूषणानि दत्तानि। वृक्षवनस्पत-याच अपि शकुन्तलां प्रति स्नेहं प्रदर्शितम्, यतोडि शकुन्तला तेषां संरक्षणसेवाश सम्यक् करोति स्मा अत्र कविः तपोवनेन द्वारा सामाजिकतायाः वर्णनं कृतवान् यत् कन्यायाः पतिगृहं गमनसमये बान्धवाः किञ्चित् उपहारं ददन्ति स्म । सर्वे वनवृक्षाः शकुन्तलायाः बन्धूसदृशम् आसन्। अतः ते शकुन्तलायाः कृते उपहारम् अवदुः।

शैक्षिकनिहितार्थं विद्यते यत् येन प्रकारेण वृक्षैः शकुन्तलायाः प्रेमवशात् विविधप्रकाराणाम् आभूषणवस्त्राणीम् अदीयत् तेन प्रकारेण आधुनिक मानवैः द्वारा वृक्षाणां संरक्षणं कृत्वा जीवनो-पयोगी समस्त वस्तू प्रामुं शक्यन्ते यतोहि वृक्षाः सर्वदैव मानवकल्याणस्य कृते स्व सर्वस्वं समर्पितं कुर्वन्ति।

अतः अस्माकम् उत्तरदायित्त्वं भवति यत् अस्मानपि निरन्तरं वृक्षाणों संरक्षणसंवर्धनञ्च कुर्मः।

पुनश्च-

**उद्भितदर्भकवला मृग्यः परित्यक्तनर्तना मयूराः।**
**अपसृतपाण्डुपत्रा मुञ्चन्त्यश्रूणीव लताः ।।**

(4/12 अभिज्ञानशाकुन्तलम् )

अस्य श्लोकस्यार्थः विद्यते यत् प्रियंवदा शकुन्तलाविरहेण तपोवनस्य विरहावस्थां वर्णयति यत्- हरिण्यः चर्वितमपि दर्भाकुरग्रासं मुखात् परित्यक्त्यः मौनं तिष्ठन्ति।

**2. नैतिक शिक्षा**

नैतिकशिक्षायाः अर्थः वर्तते नीतिमूलक शिक्षा नैतिकता एका महान् गुणोऽस्ति। नैतिकशिक्षा सा प्रक्रिया वर्तते यस्य माध्यमेन जनाः अपरेषु नैतिकमूल्यानि संरच्यन्ते। शिक्षया द्वारा नैतिक-मूल्यानां सन्चारः सुगमतया कर्तुं शक्यन्ते । नैतिकतया विना कापि शैक्षिकप्रक्रिया सुचारूतया न प्रचलति। नैतिकशिक्षा एतादृशी आचरणसंहिता विद्यते, यया व्यक्तिः सुनिश्चितलक्ष्यप्राप्ति हेतु स्वजीवनपद्धत्याः निर्माणं करोति, तथा च व्यक्तित्वस्य निर्माणं भवति। नैतिकशिक्षायाः अभावे समाजे कुरीतयः, भ्रष्टाचारादि अनेके दोषाः समागच्छन्ति।

नैतिकमूल्यानां माध्यमेन व्यक्तिः आदर्शजीवनं यापयति मूल्यं जन्मजात नैव वर्तते, नीतिशास्त्रम् इत्यादि द्वारा प्राप्यन्ते। नैतिकमूल्यानि भवन्ति-सद्गुणः, दया, दानं, करूणा, त्याग, परोपकारः, सत्यंवदः, प्रेम सम्मानकुरु इत्यादि। शिक्षायाः सन्दर्भ समाजे च तस्य पालनम् अतीवावश्यकं भवति। नैतिकशिक्षां विना न तु अध्यापकः यथार्थरूपेण शिक्षणकाम सम्पादयति न तु छात्राः अध्यापकेन प्रदातज्ञानं ग्रहीतुं न शक्नुवन्ति। अतः नैतिकशिक्षा मानवस्य जीवने बह आवश्यकं वर्तते। नैतिकशिक्षा इदं शिक्ष्यते यत् समाजे, वृद्धजनैः सह, मित्रैः सह, अन्यजनैः सह कथं व्यवहारं करणीयमस्ति । नैतिकशिक्षायाः मूल्यान् शिक्षायां विशेषस्थानं दातव्यमिति ।

अतेव अभिज्ञानशाकुन्तलनाटकेऽपि नैतिकशिक्षायाः विषये अनेक-श्लोकाः दृश्यन्ते। यथा-

**विचिन्तयन्ती यमनन्यमानसा,**
**तपोधनं वेत्सि न मामुपस्थितम्।**
**स्मरिष्यति त्वां न स बोधितोऽपि सन्**
**कथां प्रमत्तः प्रथमं कृतामिव।।**

(4/1 अभिज्ञानशाकुन्तलम् )

अस्य श्लोकस्यार्थः वर्तते यत् महर्षिकण्वस्याश्रमे आतिथ्यग्रहणार्थं स्वयमुपस्थितो ऋषिदुर्वासा स्वागमननिवेदनमनवधानानां द्वारदेशे विषयाणां शून्यहृदयां शकुन्तला विलोक्य निजावमानेन अतिक्रुद्धः भूत्वा शापं दत्तवान् यत् हे अतिथितिरस्कारिणि शकुन्तला ! त्वं एकाग्रचित्त भूत्वा यं पुरुषं चिन्तयसि। मां चातिथिं न जानासि, सः पुरुषः स्मारितोऽपि त्वां न स्मरिष्यति। यथा कोऽपि प्रमादीपुरुषः पूर्वं कथितवार्ता बोधितः अपि न स्मरति इति।

उपर्युक्त श्लोकस्य आशयः अस्ति यत् दुर्वासा ऋषिः कण्वस्य आश्रमम् आगच्छति, तस्मिन् समये शकुन्तला स्वपतिदुष्यन्तस्य विषये ध्यानमग्ना वर्तते स्म। शकुन्तला आगन्तृणाम् अतिथेः ध्यानं न दत्तवती। ध्यानमग्नः यः कोऽपि भविष्यति सः अन्यासां किं स्वमेव ध्यानं न करोति। एतादृशी स्थितिः शकुन्तलायाः अपि आसीत् अतः सा अतिथिरूपी दुर्वासाऋषेः आतिथ्यसत्कारं न कृतवती तथा च सः ऋषिः क्रुद्धः भूत्वा शकुन्तला शापः दत्तवान् भारतीय ज्ञानपरंपरा दृष्ट्या अस्माकं भारतीयसंस्कृती अतिथिसत्कारस्य भावना बहुप्रबला वर्तते। अतिथि सः भवति यः सूचनया विना अर्थात् अकस्मात् आगच्छति अस्माकं धर्मशास्त्रेषु "अतिथि देवो भवः" इति मन्यते सर्वः। अतः अतिथिनां कदापि अपमान न करणीयम्, सः

देवतुल्यः भवति। अतः अनेन श्लोकमाध्यमेन छात्रेष अतिथिसत्कारस्य भावनायाः विकासः कर्तुं शक्यते।

पुनश्च-

**यस्य त्वया व्रणविरोपणमिङ्गुदीनां,**
**तैलं न्याषिच्यत् मुखे कुशसूचिविद्धे।**
**श्यामाकमुष्टिपरिवर्धितको जहाति**
**सोऽयं न पुत्रकृतकः पदवीं मृगस्ते।।**

(4/14 अभिज्ञानशाकुन्तलम्)

अस्य श्लोकस्य अर्थः अस्ति यत् महर्षे कण्वः शकुन्तलामनुसरन्तं मृगशावकमवलोक्य तस्य परिचयं ददत्- हे पुत्री! दयार्द्रहृदया त्वया दर्भाकुरभक्षणक्षत मुखस्य यस्य मृगशावकस्य मुख्यस्याभ्यन्तरे इङ्गुदीतैलं निक्षिप्य वृणः शोषितः स्वयमत्तुमसमर्थमृगस्य श्यामकं मुष्टौ हीत्वा तन्मुखेऽर्पित्वा पुत्रवत्पालितः। सोऽयं मृगशिशुः त्वद्विरहदुः खितः ते पन्थानं न त्यजति।

अस्य श्लोकस्याशयः वर्तते यत् शकुन्तला अत्यन्तदयाशीला अस्ति, सा विक्षत् मृगशावकस्य मुखे इड्गुदीतैलं निक्षिप्य उपचारं करोति। तम् स्वहस्तेन श्यामकं खादयित्वा तस्य पुत्रवत् पालनं करोति। शकुन्तलायाः हृदये परोपकारस्य भावना वर्तते।

अनेन श्लोकेन छात्राः परोपकारस्य शिक्षां प्राप्नुवन्ति येन प्रकारेण सा परोपकारस्य भावनया मृगशिशोः रक्षां करोति, तेन प्रकारेण मनुष्यान् अपि पशुपक्षीन्प्रति करूणा, दया, स्नेहश्च भावना भवितव्यम्। पशुपक्षी मनुष्याणां भाषां वदितुं न शक्यन्ते किन्तु प्रेमस्य भाषा जानन्ति। अतः कदापि तान् न हन्तव्यम्, तस्य सुरक्षा करणीया।

मानवेषु परोपकारस्य भावना भवितव्यम्। शास्त्रेषु अपि कथ्यन्ते यत् मानवस्य इदं शरीरं परोपकारस्य कृते अस्ति।

ग्रन्थेषु अपि उक्तम्-

आत्मार्थ जीवलोकेऽस्मिन् को न जीवतिमानवः। परं परोपकारार्थ यो जीवति स जीवति।।

पुनश्च -

**भूत्वा चिराय चतुरन्तमहीसपत्नी,**
**दौष्यन्तिमप्रतिरथं तनयं निवेश्य।**
**भर्त्ता तदर्पितकुटुम्बभरेण साकै,**
**शान्ते करिष्यसि पदं पुनराश्रमेऽस्मिन्।।**

(14/201 शाकुन्तलम् )

अस्य श्लोकस्यार्थः वर्तते यत् शकुन्तला पितरं पृच्छति अह इयं तपोवनं पुनः कदा द्रक्ष्यामि तदा महर्षिकण्वः कथयति यत् वत्से! बहुकालपर्यन्तं सकलपृथिव्याः समानभर्तृका भूत्वा अर्थात् चक्रवर्तिनो राजर्षेः दुष्यन्तस्य प्रधानमहिषीपदे स्थिता तत्र दिव्यान् राजभोगानुपभुञ्जाना यशस्विनमेकच्छत्रं पुत्रं प्रसूय तत्र राज्यभारं निवेश्य, निश्चिन्तेन पतिदुष्यन्तेन सह चरमे वयसि पुनः अस्मिन् धर्मारण्ये आगमिष्यसि।

उपर्युक्त श्लोकस्य भावार्थः अस्ति यत् प्राचीनकाले राजा विषयोपभोगं कृत्वा अनन्तरं वृद्धावस्थायां स्वयोग्यं पुत्रं राज्यभारं दत्वा पत्न्या सह वने निवासं कृत्वा वानप्रस्थस्य जीवनयापनं करोति स्म अस्य नियमानुसारे महर्षिकण्वः शकुन्तलां स्वपत्युः मन्त्र पनः तपोवनं गमनस्य संकेतं कृतमस्ति ।

शैक्षिकदृष्ट्या प्राचीनकाले मानवजीवनयात्रां चतुर्षु आश्रमेषु विभक्तमासन्। प्रथमः ब्रह्मचर्याश्रमः द्वितीयः गृहस्थाश्रमः, तृतीयः वानप्रस्थाश्रमः, चतुर्थश्च अन्तिमः सन्यासाश्रमः वर्तन्ते। अतः अनेन श्लोकमाध्यमेन छात्रान् आश्रमव्यवस्थायाः विषये ज्ञानं दातव्यम्।

पुनश्च-

**भवन्ति नम्रास्तरवः फलागमैः-**
**र्नवाम्बुभिर्दुरविलम्बिनो घनाः।**
**अनुद्धताः सत्पुरुषाः समृद्धिभिः**
**स्वभाव एवैष परोपकारिणाम्।**

(5/12 अभिज्ञानशाकुन्तलम्)

अस्य श्लोकस्यार्थः वर्तते यत् वृक्षाः फलोद्गमैः अधोमुखाः भवन्ति। मेघाः वर्षाकालारम्भे नवजलधरैः नताः भवन्ति। सज्जनाः अपि धनविद्याधिकारादिसम्पत्तिभिः विनम्रतां धारयन्ति। एषः तु परोपकारीपुरुषाणां स्वाभाविकगुणाः वर्तन्ते।

श्लोकस्याशयः शार्ङगरवः पुरोहितं प्रति कथयति यत् राज्ञा ऋषीणां सम्मानं करणं प्रशसनीयः वर्तते तथापि वयं तु अस्मिन् विषये निस्पृही भवामः। राज्ञः प्रशसा करणं व्यर्थमेव अस्ति। महान् पुरुषाणां कृते अयं तु स्वाभाविकः एव वर्तते यत् ऋषिभिः मेलनसमये सिंहासनं व्यजनं, तेषां प्रतिक्षाकरणं, तान् प्रति विशेषसम्मानं प्रदर्शयति। यदा वृक्षाः मेघाश्च अचेतनाः भूत्वा अपि परोपकारे सर्वदा उद्यताः सन्ति, तु चेतन राज्ञः किं कथनं?

परोपकारः तु चेतनाचेतनेषु समानमेव अभिनन्दनीयः वर्तते। शैक्षिकनिहितार्थः वर्तते यत् यदा अचेतनाः वक्षामेघाश्च परोपकाराय सदैव तत्पराः भवन्ति। तदा मनुष्यः तु असावेतनप्राणी अस्ति, तमपि वृक्षमेघाणाञ्च सदृशं परोपकारः करणीयः। सज्जनपुरुषाः तु स्वभावेन एव परोपकारिणाः भवन्ति। अतः अनेन श्लोकमाध्यमेन छात्रेषु परोपकारस्य भावनायाः विकासः भवति।

### 3. धार्मिकशिक्षा -

धार्मिकशिक्षा शब्दः द्वे शब्देन निर्मितः सञ्जातः। प्रथमः "धार्मिकः" द्वितीयः "शिक्षा" अर्थात धर्मेण सम्बद्धशिक्षा "धार्मिकशिक्षा" इति मन्यते।

"धर्म" शब्दः आंग्लभाषयाः Religion इति पर्यायपदम् इति उच्यते। अस्यार्थः वर्तते यत् एकमानवस्य अन्यमानवं प्रति

सद्भावनानाम्, अधिकाराणा, कर्तव्याणश्च बन्धने बन्धनं कृत्वा परस्पर सम्बन्धं स्थापनम् कुर्वन्ति।

**धर्मस्यार्थः**

धर्मस्य सङ्कुचितार्थः अस्ति यत् कस्यापि धर्मविशेष प्रति अतिश्रद्धाभावना भवेत्। अत्र केवलं धार्मिकान्धविश्वास, पूजार्चनं, कर्मकाण्डश्च इत्यादयः क्रियाः सम्मिलिताः सन्ति।

व्यापकार्थे धर्मस्यार्थः भवति यत् पवित्रहृदयः, चरित्रनिर्माणं, पवित्रता, नैतिकता, जनसेवा, आध्यात्मिकविकासः च वास्तविक-धर्मः भवति। धर्मः केवलं बौद्धिककल्पना एव नास्ति अपितु विभिन्न आध्यात्मिकमूल्यानां संग्रहः भवन्ति। यस्य सभ्यतासंस्कृत्या च घनिष्ठसम्बन्धः सन्ति। अनेन प्रकारेण मानवजीवने आध्यात्मिक-मूल्यानां विकासः, प्रत्येकात्मानम् अन्य आत्मना व्यवहारम्, अन्ते च परमात्मना सम्बन्धमेव शाश्वतधर्मः वर्तन्ते। चतुर्ष पुरुषार्थेषु धर्मः प्रथमः प्रधानः च पुरुषार्थः भवति।

महाकविकालिदासेन स्व नाटकेषु धर्मस्य विषये अनेकेषु स्थानेषु चर्चा कृताः। अतः अभिज्ञानशाकुन्तलनाटके अपि धार्मिकशिक्षया सम्बन्धिताः अनेकश्लोकाः प्राप्यन्ते ये अधोलिखिताः वर्तन्ते -

यथा-

**अमी वेदीं परितः क्लृप्तधिष्ण्याः, समिद्वन्तः प्रान्तसंस्तीर्णदर्भाः।**
**अपघ्नन्तो दुरितं हव्यगन्धै वैतानास्त्वां वह्नयः पावयन्तु।।**

(4/81अभिज्ञानशाकुन्तलम्)

अस्य श्लोकस्यार्थः वर्तते यत् पतिगृहं गच्छन्तीं शकुन्तलो सम्बोध्य महर्षिः कण्वोशीर्वादः ददति-यज्ञवेदिमभितः प्रज्वलितसमिधाः तथा च प्रान्तभागेषु विन्यस्तकुशाः, सुताज्यादिसुगन्धैः पापानि दूरयन्तः, यज्ञसम्बन्धिनः गार्हपत्य, आह्वनीय, दाक्षिणात्याग्नि एते ज्योग्नयः त्वां पवित्रीकुर्वन्तु इति उक्तवान्।

उपर्युक्त श्लोके महर्षिकण्वः शकुन्तलया अग्निहोत्रशालायां हवनीय गार्हपत्य, आह्वनीय, दाक्षिणात्य तिसृणाम् अग्नीनां प्रदक्षिणां कर्तुम् उक्त्वा ताम् आशीर्वादं दत्तवान्।

शैक्षिकदृष्ट्या हवनयज्ञश्च हिन्दुधर्मे शुद्धिकरणस्य कृते एकः कर्मकाण्ड अस्ति, यज्ञकुण्डे अग्नेः माध्यमेन देवतानां निकटे हविः प्रेषयितुम् एका प्रक्रिया अस्ति। कर्मकाण्डस्य दृष्ट्या अग्निः त्रयप्रकाराणां भवन्ति। प्रथमः आर्हपत्याग्निः, द्वितीयः आह्वनीया-ग्निः, तृतीयश्च दाक्षिणात्याग्नि इति। आवश्यकतानुसारं तिसृणाम् अग्नीनां प्रयोगः करोति।

अस्माकं संस्कृतौ माङ्गलिककार्यम् प्रारम्भकरणेन पूर्व जनाः हवनं यज्ञादि क्रियन्ते। अतः महर्षिकण्वः माङ्गलिककार्य करणस्य पूर्व हवनयज्ञादि करोति, तेन प्रकारेण समाजमपि शिक्षां प्राप्नुवन्ति यत् शुभकार्य करणस्य पूर्व यज्ञादि करणीयम्। शुभकामना, स्वास्थ्यं, समृद्धिः, अनुकूलवातावरणं निर्माणाय तथा च वायुमण्डलं शुद्धं करणस्य कृते हवन यज्ञादि आवश्यकं करणीयम् इति। अस्य बहु लाभाः महत्त्वश्च सन्ति। छात्रान् अस्मिन् विषये ज्ञानम् अस्य श्लोकस्य माध्यमेन दातुं शक्यन्ते एव इति।

**4. सामाजिकशिक्षा-**

मानवः एकः सामाजिकप्राणी अस्ति अतः मानवः समाजश्च अन्यो-न्यः अस्ति। मानवेन विना समाजः एवं समाजेन विना मानवः रिक्तः भवन्ति। समाजे वसित्वा मानवः अनेकोत्तर-दायित्वानां निर्वहणं करोति इति, अतेव तस्य कृते सामाजिकमूल्यानां ज्ञानम् आवश्यकं अस्ति। एतत् ज्ञानं सः शिक्षायाः माध्यमेन अपि प्राप्तं कर्तुम् शक्नोति। मानवान् सर्वोच्चजीवन यापनाय समाजः ये आदर्शाः प्रस्तूयन्ति सैव सामाजिकमूल्यानि भवन्ति। यथा-कुटुम्बः, वंशपरम्परा, आचार-विचारः, वर्णाश्रमः, नारीजीवनं, पुरुषजीवनं इत्यादिनि सामाजिक मूल्यानि भवन्ति।

महाकविकालिदासेन स्वनाटकेषु सामाजिकपरिप्रेक्ष्यं प्रस्तुतं कृतम्। पुरुषजीवनस्य नारीजीवनस्य च कानि कानि कर्तव्याणि सन्ति तथा च तेषां निर्वहणं केन प्रकारेण करणीयम् चतुर्थाङ्कः बहु उपयोगी अस्ति। अस्मिन् अङ्के नैके श्लोकाः प्राप्यन्ते यत्र सामाजिकशिक्षा विषये चिन्तनं करोति। तद्यथा-

**वंशानुक्रमस्य स्थानान्तरणम्**
**दुष्यन्तेनाहितं तेजो दधानां भूतये भुवः।**
**अवेहि तनयां ब्रह्मन्नग्निगर्भा शमीमिव।।**

(अभिज्ञानशाकुन्तलम्4/4)

अस्य श्लोकस्यार्थ वर्तते यत् प्रियंवदा अनुसूयां कथयति यत् यज्ञशालायां प्रविष्ट कुलपतिकण्वं प्रति पद्यबद्धया आकाशवाण्या सूचितं यत् हे ब्रह्मन् अखिल भूमण्डलस्य कल्याणाय दुष्यन्तेन निक्षिप्तवीर्य धारयन्ती स्वपुत्री शकुन्तला तथैव गर्भिणी जानीहि यथा वह्निगर्भा शमीलता इव अस्ति।

शैक्षिकदृष्ट्या अस्मिन् श्लोके महर्षिकण्वम् आकाशवाण्या द्वारा शकुन्तला गर्भिणी अस्ति इयं सूचनां प्राप्तं करोति।

गर्भाधानेन वंशानुक्रमस्य स्थानान्तरणं भवति एव। षोडशसंस्कारेषु प्रथमः संस्कारः गर्भाधानसंस्कारः वर्तते। अनेन संस्कारेण कुलस्य संवर्धनं संभवति। तथा च ज्ञानस्य, संस्कृतेः च विकासः संभवति इति।

पुनश्च-

**पितुः आशीर्वादः ययातेरिव शर्मिष्ठा भर्तुर्बहुमता भव।**
**पुत्रं त्वमपि सम्राज्यं सेव पुरुमवाप्नुहि।।**

(4/7अभिज्ञानशाकुन्तलम्)

अस्य श्लोकस्यार्थः अस्ति यत् महर्षिकण्वः कथयति वत्से! यथा प्राचीनकाले पुत्री शामिष्ठा राज्ञः ययातेः प्रियतमा आसीत्, तथैव त्वमपि पत्यु दुष्यन्तस्य अतिप्रिया भव। येन प्रकारेण शर्मिष्ठा ययातिसिंहासनासीनं पुरु पुत्रमजनयत् तेन प्रकारेण त्वमपि राजादुष्यन्तेन चक्रवर्तिनं तनयं प्राप्नुहि।

अस्य श्लोकस्य भावः अस्यि यत् महर्षिकण्वः शकुन्तलाम् आशीर्वादं ददति यत् त्वमपि शर्मिष्ठायाः इव चक्रवर्ति पुत्रं प्राप्नुहि इति।

शैक्षिक दृष्ट्या अद्यतन समाजे अपि स्त्रियः शर्मिष्ठाशकुन्तलायाश्च इव स्व पत्यु प्रिया भूत्वा चक्रवर्ति सुपुत्रं जनयन्तु। पुनश्च -

**यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया,**
**कण्ठः स्तम्भितवाष्पवृत्तिकलुषश्चन्ताजडं दर्शनम्।**
**वैक्लव्यं मम तावदीदृशमिदं स्नेहादरण्यौकसः,**
**पीड्यन्ते गृहिणः कथं न तनयाविश्लेषदः खैर्नवै।।**

(14/611अभिज्ञानशाकुन्तलम्)

अस्य श्लोकस्यार्थः वर्तते यत् महर्षिकण्वः स्वमनस्येव कथयति अद्य शकुन्तला पतिगृह गमिष्यति अतेव अन्या उत्कण्ठ्या मम मनः आक्रान्तं भवति इति मम स्वरः अपि व्याप्ताश्रृणाम् उद्मनेन द्रवीभूतो जातः, मम नेत्राभ्याम् च समक्षविषयाग्रहणासमर्थमजायत। जन्मतः आरभ्य तपोवने निवसतो वीतरागी अपि माम् यदीदृशमनिर्वचनीयं विह्वलता भवति तहि विषयासक्त गृहस्थजनाः कन्यायाः वियोग-जन्यः दःखैर्जातस्य क्लेशस्य का कथा ?

उपर्युक्त श्लोकस्याशयः वर्तते यत प्रातः कालीन कर्म परिसमाप्य पतिगृहगमनाय उद्यताम् शकुन्तला विलोक्य कन्यावियोगेन दुःखी असहमानकण्वः चिन्तयति यत् यदा अहं सामदामादि गुणैः सम्पन्नः, मोहरहितः ब्रह्मचारीतपस्वीं स्वपालिपुत्र्यः वियोगेन दुःखितः भवानि तु विषयासक्तः गृहस्थजनाः जन्मदत्वा कन्यायाः पालनं कुर्वन्ति। ते सर्वे प्रतिवियोगकरणात् कथं न दुःखिताः भविष्यन्ति अर्थात् तान् मया अधिकं दुःखं भविष्यति।

शैक्षिकदृष्ट्या अस्मिन् श्लोके कविः तपस्वीमपि ममतापूर्णः दर्शयन्ते। अतः स्पष्टं यत् कन्यायाः वियोगस्य दुःखं सर्वान् भवन्ति। परिवारस्य सर्वेषां सदस्यानां तादृशी स्थितिः भवति यादृशी महर्षि-कण्वस्य भवति स्म।

पुनश्च-

**रम्यान्तरः कमलिनीहरितैः सरोभि-**
**श्छायादुमैर्नियमितार्क मयूखतापैः।**
**भूयात् कुशेशयरजोमृदुरेणुरस्याः**
**शान्तानुकूलपवनश्च शिवश्च पन्थाः ।।**

(4/11अभिज्ञानशाकुन्तलम्)

अस्य श्लोकस्यार्थः अस्ति यत् सुकुमाराङ्गी शकुन्तला पतिगृहं गच्छन्ती मार्गमध्ये न किमपि कष्टमनुभवतादिति हेतोः तपोवना-दारभ्य पतिगृहं पर्यन्तं मध्यगामी मार्गः अस्याः श्रमविनोदनाय निरन्तरव्याप्ताभिः कमलिनीभिः श्यामलैः जलाशयैः परिपूर्ण, छायादुमै मध्याह्नसूर्यतापरहितश्च भवतु, किञ्च सुरभिमृदुः मन्दानु-कूलपवनश्च सुखकरः भवतु।

श्लोकस्याशयः वर्तते यत् वनदेवतः प्रति आकाशवाण्या शकुन्तला शुभाशीर्वादस्य रूपे कथ्यन्ते यत् मार्गे कस्यापि प्रकारस्य कष्टं न अनुभवतु इति । तस्याः मार्गः मन्दशीतलाभिः वनदेवताः भविष्यवाणीं कुर्वन्ति यत् तस्याः यात्रा सुखदा भवतु। तेन प्रकारेण अधुनासमयेऽपि जनान् यात्रां गच्छन् व्यक्तेः कते मंगलकामना करणीया अस्ति। पुनश्च-

**अस्मान् साधु विचिन्त्य संवमधनानुच्चैः**
**कुलश्चात्मन-स्त्वव्यस्याः कथमप्यवान्धवकृतां स्नेहप्रवृतिश्च ताम्।**
**सामान्य प्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया,**
**भाग्यायत्तमतः परं न खलु तद्वाच्यं वधूवन्धुभिः ।।**

(4/17अभिज्ञानशाकुन्तलम् )

अस्य श्लोकस्यार्थः वर्तते यत् महर्षिकण्वः दुष्यन्तं प्रति सन्देशं प्रेषयति यत् हे राजन्। इन्द्रियनिग्रही तपस्यापरायण च अस्माकं प्रतिष्ठां सम्यक् तया विचार्य, स्वसमुन्तनं पौरवंशञ्च विचिन्त्य, भवतः शकुन्तलाञ्च केनापि प्रकारेण बान्धवैः विनाकृतः ताम् स्वाभाविकीं प्रेमं प्रवृतिञ्च सम्यक् विचार्य, इमं शकुन्तलाम् अन्तःपुरमध्ये अन्यासु भार्यासु साधारणगौरवपूर्णम् अवलोकनीया। अतोऽधिकम् भाग्यावत्तं तत् कन्यापक्षीयजनैः नैव कथनीयम्।

अस्य श्लोकस्याशयः अस्ति यत् स्वकन्यायाः कल्याणस्य कृते महर्षिकण्वः राजादुष्यन्तं प्रति सन्देशं ददति।

राजानं स्वकुलस्य प्रतिष्ठायाः तपस्वी प्रति सम्मानस्य वार्ताम् उक्त्वा उत्तमकर्तव्याणां पालनमावश्यकं कथ्यन्ते। अस्मिन् श्लोके बहुपत्नी पुरुषान् पक्षपातहीनः भूत्वा सर्वासां कृते समानव्यवहारं कर्तव्यम् इति उपदेशं दत्वा सामाजिकऽशान्तिं दूरीकरणस्य प्रयासऽस्ति।

शैक्षिकनिहितार्थं वर्तते यत् वरपक्षीयजनैः द्वारा कन्यया सह स्नेहसम्मानञ्च करणीयम्। तया सह दुर्व्यवहारं कदापि न कर्तव्यम्। धर्मशास्त्रेषु कन्यां गृहस्य लक्ष्मी कथ्यते।

**समायोजनस्योपदेशः -**

**शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्ति सपत्नीजने**
**भर्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गमः।**
**भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी**
**यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः ।।**

(4/181 अभिज्ञानशाकुन्तलम्)

अस्मिन् श्लोके महर्षिकण्वः शकुन्तला शिक्षा ददति यत् त्वम् अत्रतः पतिगृहं प्राप्य श्वश्रू वसुरादिनां गुरूणां च सेवां कुरु। पत्युः अन्यभार्यासु प्रियसखिवत् व्यवहर्तव्यम्। पत्या अपमानिताऽपि पत्युः विरुद्धाचरणं मा कुरु। स्वसेवकान् प्रति नितराम् अनुकूला भव। सौभाग्येषु कदापि गर्व मा कुरु एवम् उक्तप्रकारेण स्त्रियः गृहिणीपदं प्राप्नुवन्ति तथा अस्य विपरीताचरणेन स्त्रियः कुलस्य पीडादायिनी भवन्ति।

शैक्षिकदृष्ट्या स्पष्टं भवति यत् अस्य श्लोकस्य माध्यमेन समायोजनस्य शिक्षां प्राप्नुवन्ति यत् मनुष्यान् समयपरिस्थितेश्च

अनुसारं समायोजनं करणीयमस्ति अतः महर्षिकण्वः शकुन्तलां सौम्यव्यवहारस्य शिक्षां ददति यतोहि इदानी शकुन्तला आश्रमवासिनी आसीत्। इदानीं सा पतिगृहं गच्छति अतः तस्याः कृते उपर्युक्त शिक्षामावश्यकी वर्तते।

महर्षिकण्वेन दत्तम् इदमोपदेशः अद्यापि समाजे सर्वाषां युवतीनां कृते आवश्यक महत्त्वपूर्णश्च वर्तन्ते। अस्य पालनं कृत्वा स्त्रियः प्रतिष्ठां प्राप्यन्ति यदि अस्य विपरीयाचरणं करिष्यन्ति तु ताः कुलस्य कृते पीडादायका भविष्यन्ति।

अतः अयमोपदेशः परिवारं प्रति औषधिः, यशप्राप्तिः, वैवाहिकजीवनं सुखमयकरणाय युवतीनां कृते आवश्यकं वर्तन्ते।

"भारतीयसंस्कृतेः अनुसार स्त्रीः पतिः, पितरी, वृद्धजनानाञ्च सेवा करणीयम् उक्तमपि

**भर्तुश्रूषणं स्त्रीणा परोधमर्मोह्यमायया।**
**तद् बन्धूनां च कल्याणि प्रजानां चानुपोषणम्।।**

पुनश्च-

**अर्थो हि कन्या परकीय एव ताम् संप्रेष्य परिग्रहीतुः।**
**जातो ममायं विशदः प्रकामं प्रत्यर्पितन्यास इवान्तरात्मा।।**

(4/22 शाकुन्तलम्)

महर्षिकण्वः कथयति यत् कन्या निश्चयेन परस्यधनं वर्तते। अद्य शकुन्तला पत्युः गृहं सम्प्रेष्य अहम् अतिप्रसन्नोऽस्मि यथा बहुकालपर्यन्तं स्वसमीपे स्थापितान्यस्य न्यासं तस्यस्वामिनं समप्रण्य न्यासरक्षकः प्रसन्नो भवति।

अस्य श्लोकस्याशयः वर्तते यत् महर्षिकण्वः वदति यत् कन्या पितुः कृते न्यासः वर्तते।

तस्य न्यासस्य यत्नपूर्वकं चिरकालपर्यन्तं सः रक्षति। ताम् योग्यवरं दत्वा एव वास्तविकरूपेण पिता शान्तिं प्राप्नोति ।

शैक्षिकदृष्ट्या स्पष्टं भवति यत् कन्या परस्यधनं वर्तते पितुः कृते। अस्याः सुरक्षा करणं समाजस्यापि दायित्वं भवति। ताम् कस्यापि प्रकारेण हननं न करणीयम्, यतोहि कन्यया समाजस्य संवर्धनं भविष्यति। कन्या अस्माकं भविष्यः अस्ति अतः अस्याः संरक्षणं प्रत्येकपितुः समाजस्य च दायित्वं वर्तन्ते।

**सांवेगिकविकासः -**

**यात्येकतोऽस्तशिखरं पतिरोषधीना-**
**माविष्कृतोऽरूणपुरःसर एकतोऽर्कः।**
**तेजोद्वयस्य युगपद् व्यसनोदयाभ्यां**
**लोको नियम्यत इवात्मदशान्तरेषु।।**

( 14/2अभिज्ञानशाकुन्तलम् )

अस्य श्लोकस्यार्थः वर्तते वत् औषधीना पति चन्द्रः एकतः पश्चिमदिशि अस्ताचलं गच्छति। अपरस्यां दिशि अरूणाग्रणी कृत्वा सूर्य प्रादुर्भवति। अनेन प्रकारेण एककालमेव सूर्यचन्द्रस्यश्च उत्थानपतनश्च भवितु संसारं भिन्न भिन्न अवस्थया शिक्ष्यते।

शैक्षिकदृष्ट्या अस्यश्लोकस्याशयः अस्ति यत् येन प्रकारेण सूर्यचन्द्रस्य एकेव काले उदयास्त्वश्च भवतः । तेन प्रकारेण अस्मिन् संसारे अपि एकस्य पतनं तु तस्मिन्नेव काले अपरस्य उपभ्युदयं भवति। यदा व्यक्तिः समृद्धि प्राप्नोति तदा सुखमनुभवति। तथा च यदि निराशं प्राप्नोति तदा दुःखी भवति। अतः अस्यश्लोकस्य माध्यमेन इयं शिक्षा प्राप्यते यत् जीवने सुखदुःखस्य अवस्था तु सूर्यचन्द्रश्च सदृशं गच्छति आगच्छति। एतानि तत्त्वानि स्थायी नास्ति। इयं तु प्रकृतेः नियमः अस्ति यत् सुखस्य अनन्तरं दुःखं, दुःखस्यश्च अनन्तरं सुखम् आगच्छति। अयं संसारः परिवर्तनशीलः वर्तते। अतः अस्मिन् परिवर्तनशीलसंसारे जनाः अपि कदा सुखी कदा दुःखी भवन्ति। अस्मिन् विषये कदापि चिन्ता न करणीया।

**5. प्रशासनिकशिक्षा -**

अभिज्ञानशाकुन्तलनाटकस्य पञ्चमाङ्के अपि केषुचित् श्लोकेषु प्रशासनस्य विषये वर्णनं प्राप्यते। ये अधोलिखिताः सन्ति-

यथा-

**स्वसुखनिरभिलाषः खिद्यसे लोकहेतोः**
**प्रतिदिनमथवा ते वृत्तिरेवंविधैव।**
**अनुभवति हि मूर्धा पादपस्तीव्रमुष्णं**
**शमयति परितापं छायया संश्रितानाम्।।**

(5/7अभिज्ञानशाकुन्तलम्)

अस्य श्लोकस्यार्थः वर्तते यत् भवान् तु स्वसुखेन रहितः जनकल्याणायेव प्रतिदिनं परिश्रमं कष्टञ्च करोति अथवा भवतः कार्यमेव एतादृशं वर्तते। यतोहि वृक्षाः सूर्यस्य सन्तापं स्वशिरे सहन्ति, किन्तु स्वाश्रितानां सन्तापं सर्वदा स्वछायया दूरीकरोति।

अस्य भावार्थः अस्ति यत् राजा स्वप्रजायाः सुखार्थ प्रतिदिन परिश्रमं क्लेशञ्च अनुभवति। यथा वृक्षाणाम् उत्पत्ति परोपकारस्य कृते अभवन्, तथैव राज्ञः अपि जन्म प्रजाकल्याणाय अथवा परोपकारस्य कृते अस्ति। अतः अस्मिन् कार्य कदापि कष्ट न करणीय यतोहि राज्ञाम् इयं स्वाभाविकवृत्तिः वर्तते। अत्र राज्ञः तुलना वृक्षैः सह कृतम्, ये सर्वदा आश्रिताना छायादानेनातपसन्तापं दूरीकरोति। शैक्षिकनिहितार्थ यथा राजा लोकोपकाराय परिश्रमं कृत्वा सम्यक् रूपेण प्रशासन करोति, तथैव शिक्षकमपि छात्राणां कल्याणाय राज्ञः इव उचितरूपेण शैक्षिकप्रबन्धनं प्रशासनञ्च करणीयम्। येन छात्राणामेव न अपितु समाजस्य कल्याणं भविष्यति। अतः शिक्षकं सदैव परिश्रमशीलः भवितव्यम्।

पुनश्च-

**नियमसि कुमार्गप्रस्थितानात्तदण्डः**
**प्रशमयसि विवाद कल्पसे रक्षणाय ।**
**अतनुषु विभवेषु ज्ञातयः सन्तु नाम**
**त्वयि तु परिसमाप्तं बन्धुकृत्यं प्रजानाम्।।** ( 5⁄8 )

अस्य श्लोकस्यार्थः अस्ति यत् स्वहस्ते गृहीतराजदण्डेन कुमार्गे प्रस्थातुमुद्यतान् पुरुषान् निरूध्य पुनः सुमार्गे आनयति। प्रजायाः परस्परकलहं निवारयति तस्याः च रक्षणाय सदैव तत्परः भवति। यस्य पार्श्वे अधिक धनमस्ति एतादृशजनानां कृते तस्य बहवः बान्धवाः भवन्ति। किन्तु साधारणजनानां कृते बान्धवकर्तव्यं भवता द्वारा एवं सम्पाद्यते।

**भावार्थ:-** वैतालिकः राजानं प्रति कथयति यत् भवान् तु राजदण्डेन कुमार्गे जनान् निरुध्य सन्मार्गे स्थापयति। समाजे परस्परकलहं न्यायेन निवारयति, सर्ववर्माणां रक्षामपि करोति। आधिक्यैश्वर्येषु बहवः बान्धवः भवन्ति, किन्तु निर्धनस्थ कोऽपि न बान्धवाः भवन्ति। किन्तु राजा सामान्य प्रजायाः कृते बान्धवः अस्ति, सैव तस्याः कार्याणि कारयति।

**उपसंहारः -**

अतः निष्कर्षतः वक्तुं शक्यते यत् अभिज्ञानशाकुन्तलस्य वर्णिताः विषयाः अद्यापि आधुनिकसमाजे अतीव सार्थकाः सन्ति। एते श्लोकाः अस्मान् शिक्षयन्ति यत् कथमस्माभिः पर्यावरणस्य रक्षणं करणीयम्, गुरुजनानां सम्मानं कथं विधेयम्, तथा च सर्वेषु प्राणिषु स्नेहभावः कथं स्थापनीयः। एवं प्रकारेण कालिदासस्य काव्यं केवलं रसानुभूतिं न कारयति, अपितु भारतीयज्ञानपरम्परायानुसारेण लोककल्याणाय श्रेष्ठजीवनस्य आदर्शमपि उपस्थापयति।

**सन्दर्भ ग्रन्थ सूची -**


1.अभिज्ञानशाकुन्तलम् — सम्पा. एम. आर. काले, प्रकाशक: मोतीलाल बनारसीदास प्रकाशन, दिल्ली, प्रकाशन वर्ष: 2016

2.कालिदास ग्रन्थावली — सम्पा. सीताराम चतुर्वेदी, प्रकाशक: चौखम्बा विद्याभवन, वाराणसी, प्रकाशन वर्ष: 2012

3.संस्कृत साहित्य का इतिहास —प्रकाशक: शारदा निकेतन, वाराणसी,प्रकाशन वर्ष: 2015

4.History of Sanskrit Literature —प्रकाशक: मोतीलाल बनारसीदास प्रकाशन, दिल्ली, प्रकाशन वर्ष: 1993

5.कालिदास और उनका युग—प्रकाशक: राजकमल प्रकाशन, नई दिल्ली, प्रकाशन वर्ष: 2010

6.नाट्यशास्त्रम् — सम्पा. रामकृष्ण कवि, प्रकाशक: चौखम्बा संस्कृत सीरीज़ कार्यालय, वाराणसी, प्रकाशन वर्ष: 2018

7.भारतीय संस्कृति के आधार — प्रकाशक: श्री अरविन्द आश्रम प्रकाशन विभाग, पुदुच्चेरी, प्रकाशन वर्ष: 2003

8.भारतीय दर्शन—प्रकाशक: राजपाल एण्ड सन्स, दिल्ली,प्रकाशन वर्ष: 2017

9.संस्कृत साहित्य में पर्यावरण चेतना — प्रकाशक: प्रतिभा प्रकाशन,दिल्ली,प्रकाशन वर्ष: 2014

10.कालिदास साहित्य एवं पर्यावरण—प्रकाशक:चौखम्बा सुरभा-रती प्रकाशन, वाराणसी, प्रकाशन वर्ष: 2011

11.मनुस्मृति — सम्पा. हरगोविन्द शास्त्री,प्रकाशक: चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली,प्रकाशन वर्ष: 2016

12.महाभारत—प्रकाशक: गीता प्रेस, गोरखपुर,प्रकाशन वर्ष: 2019

13. रामायण —प्रकाशक: गीता प्रेस, गोरखपुर,प्रकाशन वर्ष: 2018

14.Education in Ancient India —प्रकाशक: मोतीलाल बनारसीदास प्रकाशन, दिल्ली, प्रकाशन वर्ष: 2009

15.भारतीय ज्ञान परम्परा —प्रकाशक: डी. के. प्रिन्टवर्ल्ड, नई दिल्ली,प्रकाशन वर्ष: 2020

16.कालिदास की लालित्य योजना —प्रकाशक: राजकमल प्रकाशन, नई दिल्ली,प्रकाशन वर्ष: 2008

17.भारतीय शिक्षा का इतिहास —प्रकाशक: राजस्थान हिन्दी ग्रन्थ अकादमी, जयपुर, प्रकाशन वर्ष: 2011

18.धर्मशास्त्र का इतिहास—प्रकाशक: भण्डारकर प्राच्य शोध संस्थान, पुणे,प्रकाशन वर्ष: 1974

19.संस्कृत नाटक : उद्भव और विकास —प्रकाशक: साहित्य अकादेमी, नई दिल्ली,प्रकाशन वर्ष: 2013

20.कालिदास—प्रकाशक:लोकभारती प्रकाशन, प्रयागराज,प्रकाशन वर्ष: 2005